National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 207-212
© 2026 NJHSR
www.sanskritarticle.com

मुकुल शर्मा
शोधार्थी,
केंद्रीय संस्कृत विश्वविद्यालय,
नई दिल्ली

शोध निर्देशिका
डॉ अमृता कौर
सहायकाचार्या ,
केंद्रीय संस्कृत विश्वविद्यालय,
नई दिल्ली

Correspondence:
मुकुल शर्मा
शोधार्थी,
केंद्रीय संस्कृत विश्वविद्यालय,
नई दिल्ली

बालसाहित्यस्य सामाजिकमूल्यनिर्माणे भूमिका

मुकुल शर्मा, डॉ अमृता कौर

शोधसारांशः-बालसाहित्यं बालजीवनस्य मनोरञ्जनस्य साधनमात्रन्न वर्तते, अपि तु तस्य व्यक्तित्वनिर्माणस्य, मूल्यबोधस्य, सामाजिकचेतनायाः सांस्कृतिकपरम्परायाः संवर्धनस्य च प्रभावप्रदं माध्यमं विद्यते। बालकः यत् पठति, शृणोति, पश्यति अनुभवति च, तस्य प्रभावः तस्य विचारेषु, व्यवहारेषु, भावनासु च दीर्घकालं यावत् तिष्ठति। अतः बालसाहित्यं सामाजिकमूल्यनिर्माणस्य महत्त्वपूर्णं साधनं भवितुमर्हति। सामाजिकमूल्यानि नाम ये आदर्शाः समाजस्य सुस्थिरतां, समन्वयं, शान्तिं, सहयोगं मानवीयसम्बन्धानां दृढताञ्च स्थापयन्ति। भारतीयपरम्परायां बालसाहित्यस्य मूलाधारः अत्यन्तं समृद्धो वर्तते। पञ्चतन्त्रं, हितोपदेशः, रामायणम्, महाभारतम्, पुराणानि, जातककथाः लोककथाश्च बालकानां कृते नीतिमूल्ययुक्तं कथासाहित्यं प्रददति। मैत्री, सत्यनिष्ठा, सहयोगः, दया, क्षमा, त्यागः, कर्तव्यबोधः, न्यायः, परोपकारः, प्रकृतिप्रेम, सामाजिकसमरसता, राष्ट्रचेतना विश्वबन्धुत्वञ्च इत्यादीनि मूल्यतत्त्वानि एतेषु साहित्येषु विविधरूपेण प्रतिपादितानि सन्ति। आधुनिकयुगे बालसाहित्यस्य स्वरूपं परिवर्तितं दृश्यते। मुद्रितपुस्तकैः सह ई-पुस्तकानि, श्रव्यपुस्तकानि, चित्रकथाः, एनीमेशन, डिजिटल-क्रीडाः कृत्रिमबुद्धिमत्ताधारितसामग्री अपि बालजीवनस्य अङ्गानि जातानि। अतः सामाजिकमूल्यनिर्माणस्य प्रक्रिया अपि नूतनमाध्यमैः प्रभावितं भवति। अस्मिन् लेखे बालसाहित्यस्य सामाजिकमूल्यनिर्माणे योगदानं, तस्य विविधाः आयामाः, मनोवैज्ञानिकाधाराः, आधुनिकपरिस्थितयः भविष्यत्सम्भावनाश्च विवेच्यन्ते।

मुख्यशब्दाः— बालसाहित्यम्, सामाजिकमूल्यम्, मूल्यनिर्माणम्, बालमनोविज्ञानम्, संस्कारः, मैत्री, सहयोगः, सामाजिकसमरसता, राष्ट्रचेतना, पर्यावरणचेतना।

प्रस्तावना- स्वभावतः मानवः सामाजिकः प्राणी वर्तते। सः परिवारस्य, विद्यालयस्य, मित्रसमूहस्य, समुदायस्य व्यापकसमाजस्य च सदस्यत्वेन जीवनं यापयति। समाजस्य सुचारुसञ्चालनाय केवलं भौतिकसमृद्धिः पर्याप्ता न भवति; परस्परविश्वासः, सहयोगः, न्यायः, सहिष्णुता, दया, कर्तव्यबोधः उत्तरदायित्वभावना चापि आवश्यकाः भवन्ति। एतेषाम् आदर्शानां समष्टिरूपमेव सामाजिकमूल्यमिति कथयितुं शक्यते। बाल्यावस्था व्यक्तित्वनिर्माणस्य मूलावस्था वर्तते। अस्मिन् काले बालकस्य मनः अत्यन्तं ग्रहणशीलं भवति। सः परिवेशात् व्यवहारं, भाषा, संस्कारान्, आदर्शान् सामाजिकमान्यताश्च अधिगच्छति। अतः बाल्ये प्रदत्ताः अनुभवाः जीवनस्य भाविदिशां निश्चितुं शक्नुवन्ति। बालसाहित्यं बालकस्य मानसिकसृष्ट्या सह अत्यन्तं निकटसम्बन्धं स्थापयति। कथाभिः, कविताभिः, गीतैः, नाटकैः, संवादैः चित्रकथा-इत्यादिभिः बालकः मनोरञ्जनं प्राप्नोति, किन्तु तेन सह सः जीवनस्य विविधमूल्यानां परिचयं प्राप्नोति। कथा-पात्राणां माध्यमेन सः सत्यस्य महत्त्वं, मैत्र्याः आवश्यकता, सहयोगस्य शक्ति, दुष्कर्मणः परिणामः सदाचारस्य फलञ्च अनुभवति। अतः बालसाहित्यस्य सामाजिकमूल्यनिर्माणे भूमिका गम्भीरा, व्यापकाः दूरगामिनी च अस्ति।

बालसाहित्यम् इति पदेन बालानां कृते लिखितं वा बालानां द्वारा सहजतया ग्राह्यं साहित्यं बोध्यते। बालसाहित्यस्य विषयवस्तु, भाषा, शैली, पात्रयोजना प्रस्तुतीकरणं च बालमनोविज्ञानानुकूलं भवति।

बालसाहित्यस्य प्रमुखरूपाणि बालकथाः, बालकविताः, बालगीतानि बालनाटकानि, चित्रकथाः, जीवनी, लोककथाः, नीतिकथाः, विज्ञानकथाः, साहसकथाः, प्रकृतिकथाः, ऐतिहासिककथाः, पौराणिककथाश्च इत्यादीनि सन्ति। बालसाहित्यस्य वैशिष्ट्यं तस्य सरलता, रोचकता, कल्पनाशीलता, लयात्मकता बालकेन्द्रितता चास्ति, परन्तु सरलता इत्यस्य अर्थः विचारहीनता नास्ति। सरलभाषायामपि गम्भीरजीवनमूल्यानि प्रतिपादयितुं शक्यन्ते।

सामाजिकमूल्यस्य संकल्पना- मूल्यमिति पदेन कस्यचित् आदर्शस्य, गुणस्य अथवा आचरणस्य महत्त्वं बोध्यते। यानि मूल्यतत्त्वानि व्यक्तीनां परस्परसंबन्धान् सुदृढान् कुर्वन्ति समाजस्य च कल्याणाय सहायन्ते, तानि सामाजिकमूल्यानि कथ्यन्ते। प्रमुखेषु सामाजिक-मूल्येषु सत्यं, अहिंसा, दया, मैत्री, सहयोगः, सहिष्णुता, समानता, न्यायः, बन्धुत्वम्, परोपकारः, कर्तव्यबोधः, उत्तरदायित्वम्, सामाजिकसमरसता, प्रकृतिसंरक्षणम्, राष्ट्रचेतना च इत्यादीनि अन्तर्भवन्ति। सामाजिकमूल्यं केवलं सैद्धान्तिकज्ञानं न भवति, तस्य वास्तविकता व्यवहारे दृश्यते-

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्॥[1]

यदि बालकः सहयोगस्य महत्त्वं पठति, किन्तु सहपाठिनं साहाय्यं न करोति, तर्हि मूल्यज्ञानं व्यवहारमूल्ये परिवर्तितं न भवति। अतः बालसाहित्यस्य कार्यं मूल्योपदेशात् अधिकं मूल्यजीवनस्य प्रेरणां प्रदातुमस्ति। बालकः अनुकरणशीलो भवति। सः कथापात्रेषु स्वस्य प्रतिबिम्बं पश्यति, तेषाञ्च व्यवहारात् प्रभावितो भवति। यदि कथायां नायकः कठिनपरिस्थितौ सत्यं न त्यजति, मित्रस्य साहाय्यं करोति, स्वार्थस्य च परित्यागं करोति, तर्हि बालकस्य मनसि तादृशस्य व्यवहारस्य आदर्शो निर्मीयते। बालसाहित्यस्य प्रभावस्य प्रमुखाः मनोवैज्ञानिकाधाराः सन्ति- बालकः आदर्शपात्रस्य व्यवहारम् अनुकरोति, बालकः कथापात्रे स्वात्मानं स्थापयति, कथा बालकस्य कल्पनाशक्तिं जागरयति, पात्रस्य सुखदुःखयोः सह बालकः भावात्मकतया सम्बध्यते, कर्मणश्च परिणामं दृष्ट्वा बालकः उचितानुचितयोः भेदं ज्ञातुं शक्नोति, अतः बालसाहित्यं मूल्यशिक्षणस्य मनोवैज्ञानिकदृष्ट्या प्रभाविसोपानं भवति।

परिवारमूल्यानां निर्माणे बालसाहित्यम्- परिवारः बालकस्य प्रथमं सामाजिकसंस्कारकेन्द्रं अस्ति। माता, पिता, भ्राता, भगिनी, पितामहः, मातामही इत्यादिभिः सह बालकस्य प्रारम्भिकाः सामाजिकानुभवाः भवन्ति। **मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।**[2] परिवारः बालकस्य प्रथमं शिक्षणकेन्द्रं वर्तते। बालकः जन्मत एव मातुः, पितुः, भ्रातुः, भगिन्याः अन्येषां कुटुम्बसदस्यानां व्यवहारं दृष्ट्वा सामाजिकजीवनस्य प्रारम्भिकान् पाठान् अधिगच्छति। परिवारस्य वातावरणं तस्य भावनात्मकविकासे, आचरणे, भाषायां मूल्यदृष्टौ च महत्त्वपूर्णं प्रभावं जनयति। अस्मिन् सन्दर्भे बालसाहित्यं परिवारमूल्यानां विकासस्य प्रभावशाली माध्यमं भवितुमर्हति। **सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।[3] सत्यं वद। धर्मं चर।[4]** परिवारः बालकस्य प्रथमः सामाजिकशिक्षणकेन्द्रं भवति। सत्यभाषणम्, वचनपालनम्, कर्तव्यनिष्ठा, अन्येषां प्रति न्यायपूर्णव्यवहारः, परिवारस्य वातावरणेन, वयस्कानां आचरणेन बालसाहित्येन पुष्टिं च प्राप्नुवन्ति। सदाचारप्रधानाः कथाः बालकं व्यवहारस्य परिणामान् विचारयितुं प्रेरयन्ति। तैत्तिरीयोपनिषदि उक्तम् मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। इति। अयं निर्देशः मातापितरं, आचार्यं, अतिथिं प्रति सम्मानभावस्य महत्त्वं प्रकाशयति। बालसाहित्ये मातृस्नेहस्य, पितृमार्गदर्शनस्य, वृद्धानां अनुभवस्य परिवारस्य सदस्येषु पारस्परिकसहयोगस्य च चित्रणं बालकस्य मनसि कृतज्ञतायाः, आदरस्य कर्तव्यबोधस्य च भावनां विकसितुं शक्नोति। तथैव सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।" इति शान्तिपाठः सहकारितायाः संयुक्तप्रयत्नस्य च महत्त्वं प्रतिपादयति। परिवारजीवने सहयोगः केवलं आर्थिकसहायतायां न सीमितः; अपितु भावनात्मकसमर्थनम्, गृहकार्येषु सहभागिता, परस्परं श्रवणम्, विवादानां शान्तिपूर्णसमाधानं संकटसमये साहाय्यं च अस्य अन्तर्गतं भवन्ति। बालसाहित्यस्य कथाः एतानि मूल्याणि बालकस्य अनुभवगम्यं रूपं दातुं शक्नुवन्ति। बालकथासु माता-पित्रोः त्यागः, भ्रातृभगिन्योः स्नेहः, वृद्धान् प्रति करुणा, सत्यभाषणम्, वचनपालनं परिवारस्य सामूहिकहितस्य च संरक्षणम् इत्यादीनां घटनानां माध्यमेन बालकः मानवीयसम्बन्धानां महत्त्वमवगच्छति। यदा सः कथापात्राणां निर्णयान् तेषां परिणामांश्च अवलोकयति, तदा तस्य नैतिकविवेकः विकसितुं शक्नोति। अतः बालसाहित्यं केवलम् उपदेशात्मकं न भवति; तत् अनुभवाधारितं मूल्यशिक्षणमपि प्रदातुं समर्थम् अस्ति। आधुनिकशिक्षाशास्त्रीयदृष्ट्यापि बालकस्य प्रारम्भिकविकासे परिवारस्य सामाजिक-भावनात्मकशिक्षायाः महत्त्वं स्वीकृतं विद्यते। अतः परिवारमूल्यसम्बद्धानां कथानां वाचनेन, कथाचर्चया, पात्रविश्लेषणेन परिवारसदस्यैः सह संवादः बालकस्य मूल्यग्रहणप्रक्रियां समर्थयितुं शक्नुवन्ति। एवं बालसाहित्यं परिवारस्य भावनात्मकैक्यं, पारस्परिकसम्मानं, उत्तरदायित्वबोधं सहजीवनस्य च संस्कारं पुष्टं कर्तुं शक्नोति। तथापि तस्य प्रभावः स्वतः सुनिश्चितो नास्ति; सः साहित्यस्य गुणवत्तां, बालकस्य आयुः, पारिवारिकवातावरणं वयस्कानां व्यवहारं च आश्रयति। अतः बालसाहित्यस्य चयनं बालमनोविज्ञानानुकूलतया तथा समकालीन-परिवारजीवनस्य विविधतां दृष्ट्वा करणीयम्। बालसाहित्ये पारिवारिककथानां माध्यमेन मातृपितृसम्मानः, वृद्धानां प्रति आदरः, भ्रातृभगिनीप्रेम, पारस्परिकसहयोगः, त्यागभावना, उत्तरदायित्व-श्चेत्यादीनि मूल्यतत्त्वानि विकसितुं शक्यन्ते। यदि बालकथा परिवारस्य समस्यां, संवादस्य महत्त्वं, परस्परसम्मानं च सरलतया प्रतिपादयति, तर्हि बालकः परिवारजीवनस्य सूक्ष्ममूल्यानि सहजतया अवगच्छति।

मैत्रीभावस्य विकासः- बालजीवने मैत्री अत्यन्तं महत्त्वपूर्णा भवति। बालकः मित्रैः सह क्रीडति, अध्ययनं करोति, अनुभवं परस्परमादान-प्रदानं करोति भावनाश्च व्यक्तं करोति। बालसाहित्ये मित्रताविषयकाः

कथाः बालकेषु निम्नलिखितमूल्यानि जनयन्ति। यथा विश्वासः, सहयोगः, त्यागः, क्षमा, संवादः, परस्परमवगमनं, संकटे साहाय्यञ्च। पञ्चतन्त्रे मित्रलाभसम्बद्धाः कथाः मैत्र्याः महत्त्वं प्रभावशालिरूपेण दर्शयन्ति। मित्रता केवलं मनोरञ्जनसम्बन्धः न, अपि तु परस्परविश्वासस्य सहयोगस्य चाधारः इति बालकः कथाभिः ज्ञातुं शक्नोति। पञ्चतन्त्रस्य द्वितीये तन्त्रे मित्रसम्प्राप्तिः इति शीर्षके मैत्रीभावस्य विविधाः पक्षाः निरूपिताः सन्ति। लघुपतनक-काकस्य, हिरण्यक-मूषकस्य, चित्राङ्ग-मृगस्य तथा मन्थर-कूर्मस्य कथा परस्परसहयोगस्य उत्कृष्टमुदाहरणमस्ति। एते प्राणिनः स्वकीयभिन्नतां परित्यज्य परस्परं साहाय्यं कुर्वन्ति, सङ्कटस्य च समाधानं सामूहिकप्रयत्नेन साधयन्ति। अनेन बालकः ज्ञातुं शक्नोति यत् साधुमैत्री बाह्यरूपेण अथवा समानस्वभावेन न, अपितु विश्वासेन, सहयोगेन परहितचिन्तनेन च निर्मीयते। बालसाहित्ये मित्रतायाः चित्रणं केवलं मनोरञ्जनार्थं न भवति। मित्राणां परस्परं संवादः, समस्यायाः समाधानम्, विवादानां निवारणम् तथा सङ्कटकाले सहायताप्रदानम् इत्यादीनि प्रसङ्गानि बालकस्य सामाजिककौशलानि विकसितुं शक्नुवन्ति। कथापात्राणां व्यवहारस्य परिणामान् अवलोक्य बालकः विश्वासस्य महत्त्वम्, असत्यवचनस्य दुष्परिणामम् तथा सहिष्णुतायाः आवश्यकता च अवगच्छति-

केनामृतमिदं सृष्टं मित्रमित्यक्षरद्वयम्।
आपदं च परित्राणं शोकसन्तापभेषजम्॥[5]

सहयोगभावनायाः निर्माणम्- समाजः सहयोगेन एव विकसितो भवति। एकाकिना व्यक्तिना सर्वाणि कार्याणि सम्पन्नानि कर्तुं न शक्यन्ते। अतः बाल्यादेव सहयोगस्य मूल्यं शिक्षणीयम्। बालसाहित्ये सामूहिकप्रयत्नस्य कथाः विशेषतः प्रभावशालिन्यः भवन्ति। यदा विविधानि पात्राणि एकत्रितं भूत्वा समस्यां समाधानयन्ति, तदा बालकः ज्ञातुं शक्नोति यत् सामूहिकशक्तिः व्यक्तिगतशक्तेः अपेक्षया अधिका भवितुमर्हति। एवं प्रकारेण कथा बालके अहं इत्यस्य स्थाने वयम् इति भावनां विकसितुं शक्नोति।

सहिष्णुतायाः समानतायाश्च विकासः- समाजे विभिन्नाः मताः, भाषाः, संस्कृतयः, जीवनशैल्यः क्षमताश्च सन्ति। सामाजिकशान्तेः कृते परस्परस्वीकारः सहिष्णुता च आवश्यकौ स्तः। बालसाहित्ये विविधपृष्ठभूमियुक्तपात्राणां प्रस्तुतीकरणेन बालकः ज्ञातुं शक्नोति यत् भिन्नता दोषः नास्ति। सामाजिकमूल्यनिर्माणस्य दृष्ट्या बालसाहित्यं निम्नलिखितभावनाः विकसितुं शक्नोति-सर्वे जनाः सम्माननीयाः, प्रत्येकस्य जीवनस्य मूल्यं विद्यते। एषा भावना समानतायाः सामाजिकन्यायस्य च आधारं निर्माति। बालसाहित्यं बालकस्य सामाजिकचेतनायाः विकासे महत्त्वपूर्णां भूमिकां निर्वहति। सहिष्णुता, समानता, परस्परादरः विविधतास्वीकारः स्वस्थ-समाजस्य आधारभूतानि मूल्यानि च सन्ति। बालकः कथापात्राणां व्यवहारं, तेषां परस्परसम्बन्धान् घटनानां परिणामान् च अवलोक्य अन्येषां भावनानां सम्मानं कर्तुं, भिन्नमतानि श्रोतुं सामाजिकभेदभावं च परित्यक्तुं शिक्षितुं शक्नोति। पञ्चतन्त्रस्य मित्रसम्प्राप्तितन्त्रे भिन्नस्वभावानां प्राणिनां मैत्री, परस्परसहयोगः विविधतास्वीकारस्य उदाहरणरूपेण व्याख्यातुं शक्यते। एतेषां पात्राणां मैत्री दर्शयति यत् भिन्नक्षमताः अथवा भिन्नस्वभावाः मैत्र्याः बाधकाः न भवन्ति। परस्परस्य विशेषतानां सम्मानः तथा सङ्कटकाले सहयोगः सामाजिकजीवनं सुदृढं कुर्वन्ति। अतः बालसाहित्यं बालकान् अन्येषां दृष्टिकोणं अवगन्तुं तथा मतभेदान् सहिष्णुतया समाधातुं प्रेरयितुं शक्नोति। बालसाहित्यस्य माध्यमेन सहिष्णुतायाः समानतायाश्च विकासाय कथापठनम्, पात्रविश्लेषणम्, समूहचर्चा तथा नाट्याभिनयः इत्यादयः उपायाः उपयोक्तुं शक्यन्ते। बालकाः कथापात्राणां अनुभवैः अन्येषां भावनाः अवगच्छन्ति तथा सामाजिकविविधतायाः सकारात्मकं महत्त्वं ज्ञातुं शक्नुवन्ति। एवं बालसाहित्यं समानतामूलकस्य, सहिष्णोः तथा समावेशिनः समाजस्य निर्माणे महत्त्वपूर्णं योगदानं दातुं शक्नोति।

असाधना अपि प्राज्ञा बुद्धिमन्तो बहुश्रुताः।
साधयन्त्याशु कार्याणि काकाखुमृगकूर्मवत्॥[6]

दयायाः करुणायाश्च विकासः- बालसाहित्यस्य भावात्मकपक्षः सामाजिकमूल्यनिर्माणे विशेषमहत्त्वपूर्णो वर्तते। कथायां यदि दुर्बलपात्रस्य दुःखं, पशुपक्षिणां पीडा, निर्धनस्य समस्या अथवा विपन्नस्य अवस्था चित्रिता भवति, तर्हि बालकस्य मनसि करुणभावो जागरितुं शक्नोति। करुणा सामाजिकजीवनस्य मूलमूल्येषु अन्यतमा अस्ति। परपीडां अनुभूय तस्य निवारणाय प्रयत्नः करणीयः इति भावना बालसाहित्येन सहजतया विकसितुं शक्यते। विष्णुशर्मप्रणीतस्य पञ्चतन्त्रस्य कथासु पशुपक्षिणः मानवीयभावानां प्रतीकरूपेण चित्रिताः सन्ति। तेषां माध्यमेन बालकाः अवगच्छन्ति यत् मैत्री, सहयोगः, परोपकारः, परस्परक्षणं च जीवनस्य महत्त्वपूर्णानि तत्त्वानि सन्ति। विशेषतः मित्रसम्प्राप्ति तन्त्रे काकस्य, मूषकस्य, मृगस्य, कूर्मस्य च मैत्रीप्रसङ्गः परस्परसाहाय्यस्य महत्त्वं प्रतिपादयति। संकटग्रस्तस्य मित्रस्य रक्षणार्थं सर्वे स्वस्वबुद्धेः सामर्थ्यस्य च उपयोगं कुर्वन्ति। अयं प्रसङ्गः बालकेषु मित्रस्य दुःखे सहभागितायाः, सङ्कटसमये सहाय्यप्रदानस्य, अन्येषां प्रति संवेदनशीलतायाश्च भावं जनयति।

सत्यनिष्ठायाः निर्माणम्- सत्यं सामाजिकविश्वासस्य मूलं भवति। असत्यं जनेषु अविश्वासं जनयति, सत्यं तु सम्बन्धान् सुदृढयति। बालकथासु सत्यवादिनः पात्रस्य अन्तकाले सम्मानः असत्यस्य दुष्परिणामश्च प्रदर्शयितुं शक्यते। किन्तु केवलं सत्यं वद इति उपदेशेन अपेक्षितः प्रभावो न भवति। कथानकस्य माध्यमेन सत्यस्य व्यावहारिकमहत्त्वं प्रदर्शनीयमिति। अनेन बालकः अनुभवति यत् सत्यनिष्ठा केवलं नैतिकनियमो न, अपि तु सामाजिकविश्वासस्य आधारः वर्तते। मुण्डकोपनिषदि प्रतिपादितं सत्यमेव जयते नानृतम् इति वचनं सत्यनिष्ठायाः महत्त्वं प्रकाशयति। बालसाहित्ये सत्यवादिनां पात्राणां चित्रणेन, असत्याचरणस्य परिणामानां वर्णनेन, सत्यपालनस्य उदाहरणैश्च बालकानां नैतिकविवेकः विकसितुं शक्यते। एतादृशं साहित्यं बालकान् सत्यभाषणे, निष्कपटव्यवहारे, स्वदोषस्वीकारे, वचनपालने च प्रेरयति। अतः सत्यनिष्ठायाः निर्माणे बालसाहित्यस्य महत्त्वपूर्णं योगदानं वर्तते।

सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः।
येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत् सत्यस्य परमं निधानम्॥[7]

कर्तव्यबोधस्य विकासः- सामाजिकजीवने अधिकारैः सह कर्तव्येष्वपि ध्यानं दातव्यं भवति। बालकः यदि केवलं स्वाधिकारं जानाति, किन्तु

स्वकर्तव्यं न जानाति, तर्हि सन्तुलितं सामाजिकव्यक्तित्वं निर्मातुं कठिनं भवति। बालसाहित्ये विद्यार्थी, पुत्रः, मित्रं, नागरिकः, पर्यावरणरक्षकश्च इत्यादिरूपेषु पात्राणि स्थापयित्वा कर्तव्यबोधं विकसितुं शक्यते। एवं प्रकारेण बालकः अवगच्छति यत् अधिकारः, कर्तव्यम्, उत्तरदायित्वम्, स्वस्थसामाजिकजीवनं च। **सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।**[8] अयं उपदेशः बालकानां कर्तव्यबोधस्य निर्माणे महत्त्वपूर्णः अस्ति। सत्यं वद इति वाक्यं सत्यनिष्ठां, धर्मं चर इति वाक्यं सदाचरणं कर्तव्यपालनं च, तथा स्वाध्यायान्मा प्रमदः इति वाक्यं अध्ययननिष्ठां नियमिततां च प्रेरयति। बालसाहित्ये एतेषां मूल्यानां कथात्मकं चित्रणं बालकान् स्वदायित्वस्य निर्वहणे, अनुशासनपालने, समाजहितकारीव्यवहारे च प्रेरयितुं शक्नोति।

सामाजिकोत्तरदायित्वस्य विकासः- समाजस्य समस्या केवलं शासनस्य वयस्कानां वा समस्या नास्ति। बालकः अपि स्वपरिसरे उत्तरदायित्वपूर्णं व्यवहारं कर्तुं शक्नोति। बालसाहित्ये स्वच्छता, जलसंरक्षणम्, वृक्षारोपणम्, सार्वजनिकसम्पत्तेः संरक्षणम्, वृद्ध-साहाय्यम्, दुर्बलजनसहयोगश्च इत्यादयः विषयाः सामाजिक-उत्तरदायित्वं जागरयितुं शक्नुवन्ति। एवं बालसाहित्यं बालकं समाजस्य सदस्यः इति भावेन परिचाययति। सामाजिकोत्तरदायित्वं समाजस्य, परिवारस्य, राष्ट्रस्य समस्तजीवजगत् च प्रति स्वकीयकर्तव्यस्य अवबोधो भवति। मनुष्यः समाजस्य अभिन्नं अङ्गं वर्तते; अतः समाजस्य कल्याणे, सामाजिकव्यवस्थायाः संरक्षणे, परस्परसहयोगे, पर्यावरणरक्षणे च तस्य महत्त्वपूर्णं योगदानं भवति। बाल्यावस्थायामेव सामाजिकोत्तरदायित्वस्य विकासः आवश्यकः, यतः अस्मिन्नेव काले बालकः सहजीवनस्य, सहयोगस्य, अनुशासनस्य, परोपकारस्य च महत्त्वमवगच्छति। बालसाहित्यं सामाजिकोत्तरदायित्वस्य विकासे प्रभावशालि माध्यमम् अस्ति। नीतिकथाः, पशुपक्षिकथाः, पौराणिकाख्यानानि, समाजोपयोगिनां पात्राणां चरित्रचित्रणं च बालकान् स्वहितात् परं समाजहितमपि चिन्तयितुं प्रेरयन्ति।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि॥[9]

बालसाहित्यं सामाजिकोत्तरदायित्वस्य विकासे महत्त्वपूर्णां भूमिकां निर्वहति। सामाजिकोत्तरदायित्वं नाम समाजस्य कल्याणाय स्वकर्तव्यस्य सम्यक् अवबोधः तस्य च निर्वहणम्। श्रीमद्भगवद्गीतायां लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि इति वचनेन लोककल्याणस्य महत्त्वं प्रतिपादितम्। पुनः यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः[10] इति श्लोकेन आदर्शाचरणस्य सामाजिकप्रभावः प्रकाशितः। तैत्तिरीयोपनिषदः मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव इति उपदेशः पारिवारिकसामाजिकसम्बन्धं प्रति सम्मानभावं वर्धयति। पञ्चतन्त्रस्य मैत्रीप्रधानाः कथाः बालकान् सहयोगाय, परोपकाराय, सामूहिकदायित्वस्य निर्वहणाय च प्रेरयन्ति। अतः बालसाहित्यं बालकान् उत्तरदायिनः, सहयोगशीलान्, संवेदनशीलान् समाजोपयोगिनश्च नागरिकान् निर्मातुं समर्थम् अस्ति।

राष्ट्रचेतनायां बालसाहित्यस्य योगदानम्- बाल्यावस्थायामेव राष्ट्रबोधस्य निर्माणं महत्त्वपूर्णं भवति। राष्ट्रप्रेमं केवलं घोषवाक्य-रूपेण न, अपि तु राष्ट्रस्य इतिहासं, संस्कृति, प्रकृतिसम्पद्, वैविध्यं नागरिककर्तव्यश्च ज्ञात्वा विकसितुं शक्यते। बालसाहित्ये राष्ट्रनायकानां जीवनकथाः, वैज्ञानिकानां योगदानम्, समाजसेवकानां कार्याणि ऐतिहासिकघटनाश्च बालोपयोगिरूपेण प्रतिपादयितुं शक्यन्ते। अनेन बालकस्य मनसि देशप्रेमः, कर्तव्यबोधः, विविधतायाः सम्मानः, सामाजिकउत्तरदायित्वश्च इति समन्वितराष्ट्रचेतनां विकसितुं शक्नोति। **संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**[11] अयं मन्त्रः सामूहिकैकतायाः, संवादस्य, परस्परसहयोगस्य च महत्त्वं प्रकाशयति। बालसाहित्ये विविधप्रदेशानां, भाषाणां, संस्कृतीनां, समुदायानां च पात्राणि परस्परं सहयोगं कुर्वन्ति चेत् बालकानां मनसि राष्ट्रियैक्यस्य भावः विकसितुं शक्नोति। राष्ट्रचेतनायाः दृष्ट्या विविधतायाः सम्मानः सामूहिकहितस्य भावना विशेषतः महत्त्वपूर्णौ स्तः। ऐतिहासिककथाभिः बालकाः देशस्य इतिहासं, समाजसुधार-काणां योगदानं, स्वतन्त्रतासङ्ग्रामस्य घटनाः, राष्ट्रनिर्माणे महापुरुषाणां भूमिकां च ज्ञातुं शक्नुवन्ति। एतादृशं साहित्यं साहसं, त्यागभावना, कर्तव्यनिष्ठा, लोकसेवा च प्रेरयति। तथापि ऐतिहासिककथासु घटनानां तथ्यात्मकता तथा विभिन्नदृष्टिकोणानां समुचितं प्रस्तुतीकरणं आवश्यकं वर्तते। विष्णुशर्मविरचितं पञ्चतन्त्रम् प्रत्यक्षतया आधुनिकराष्ट्रवादस्य ग्रन्थो नास्ति, तथापि अस्य कथासु सहयोगः, मैत्री, बुद्धिमत्ता, सामूहिकसुरक्षा, सङ्कटनिवारणं च प्रतिपादितानि सन्ति। विशेषतः मित्रसम्प्राप्ति तन्त्रे काक-मूषक-मृग-कूर्माणां मैत्रीप्रसङ्गः परस्परसाहाय्यस्य महत्त्वं बोधयति। एतानि मूल्याणि राष्ट्रजीवने सामाजिकसमरसतायाः, नागरिकसहभागि-तायाश्च विकासाय उपयुज्यन्ते।

विश्वबन्धुत्वस्य भावना- आधुनिकजगत् परस्परनिर्भरं विद्यते। एकस्य देशस्य समस्या अन्यदेशानामपि समस्या भवितुं शक्यते। अतः बालकस्य दृष्टिः केवलं स्थानीयसमाजपर्यन्तं सीमिता न भवति। भारतीयपरम्परायां प्रसिद्धं वर्तते-

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥[12]

अस्य भावस्य बालसाहित्ये सरलरूपेण प्रयोगः विश्वबन्धुत्वस्य भावनां विकसितुं शक्नोति। जाति-भाषा-प्रदेश- देशभेदातीतमानव-तावादः सामाजिकमूल्यनिर्माणस्य उच्चतमं सोपानं भवितुमर्हति।

पर्यावरणमूल्यनिर्माणम्- वर्तमानसमये पर्यावरणसंरक्षणं वैश्विक-चिन्तायाः प्रमुखविषयो वर्तते। बालसाहित्यं बालकस्य प्रकृतिसम्बन्धं दृढं कर्तुं समर्थो विद्यते। वृक्षाः, नद्यः, पर्वताः, वनानि, पशवः, पक्षिणः जलचराश्च यदि कथायां पात्ररूपेण आयान्ति तदा बालकः प्रकृतिं प्रति आत्मीयतां अनुभवति। पर्यावरणविषयकबालसाहित्येन जलसं-रक्षणम्, वृक्षसंरक्षणम्, स्वच्छता, जैवविविधतारक्षणम्, पशुपक्षिप्रेम, प्राकृतिकसम्पदां संरक्षणञ्च इत्यादीनि मूल्यतत्त्वानि विकसितुं शक्यन्ते।

लोकसंस्कृतेः संरक्षणम्- बालसाहित्यं समाजस्य सांस्कृतिकस्मृतेः वाहकं विद्यते। लोककथाः, लोकगीतानि, लोकोक्तयः, पारम्परिकक्रीडाः उत्सवसम्बद्धाश्च आख्यानानि बालसाहित्यस्य माध्यमेन नूतनवंशावलीं प्रति सम्प्रेषितुं शक्यन्ते। लोकसाहित्यस्य माध्यमेन बालकः स्वसमाजस्य जीवनपद्धतिं, परम्परां सामूहिक-स्मृतिञ्च ज्ञातुं शक्नोति। अनेन सांस्कृतिकपरिचयो दृढो भवति। परन्तु

परम्परायाः संरक्षणं अन्धानुकरणरूपेण न भवेत्। यानि मूल्यतत्त्वानि मानवकल्याणाय उपयुक्तानि, तानि ग्रहणीयानि; यानि आधुनिक-मानवतामूल्यैः विरुद्धानि सन्ति, तेषां आलोचनात्मकपरीक्षणमपि आवश्यकं वर्तते। लोकसंस्कृतेः संरक्षणे बालसाहित्यस्य महत्त्वपूर्णं योगदानम् अस्ति। लोकसंस्कृतिः जनसमुदायस्य सामूहिकस्मृतेः, जीवनपद्धतेः, लोकविश्वासानां, लोकगीतानां, लोककथानां, लोककलानां च समन्वितं स्वरूपम् अस्ति। ऋग्वेदस्य संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् इति मन्त्रः सामूहिकैकतायाः सहयोगस्य च महत्त्वं प्रतिपादयति। बालसाहित्ये लोककथानां, लोकगीतानां, लोकोक्तीनां, पारम्परिकक्रीडानां, उत्सवसम्बद्धा-ख्यानानां च समावेशेन बालकाः स्वसमाजस्य सांस्कृतिकवैभवं ज्ञातुं शक्नुवन्ति। वृद्धैः कथितानां कथानां लेखनम्, स्थानीयभाषायां बालपुस्तकानां निर्माणम्, लोकगीतानां ध्वनिमुद्रणम्, पारम्परिक-कलानां चित्रात्मकप्रस्तुतिश्च सांस्कृतिकपरम्परायाः संरक्षणे सहायकाः भवन्ति।

पञ्चतन्त्रस्य सामाजिकमूल्यदृष्टिः- भारतीयबालसाहित्यपरम्परायां पञ्चतन्त्रस्य विशेषं स्थानं विद्यते। पशुपक्षिपात्राणां माध्यमेन मानवीयव्यवहारस्य विविधाः पक्षाः तत्र चित्रिताः सन्ति। पञ्चतन्त्रस्य कथासु मित्रता, बुद्धिमत्ता, सहयोगः, विश्वासः, सावधानता, संवादः, रणनीतिः, संकटप्रबन्धनञ्च इत्यादीनि सामाजिकजीवनसम्बद्धानि मूल्यतत्त्वानि दृश्यन्ते। विशेषतः मित्रभेद-मित्रलाभादिकथाभिः बालकः ज्ञातुं शक्नोति यत् परस्परविश्वासस्य अभावः सामाजिकसम्बन्धान् दुर्बलान् करोति बुद्धिपूर्वकं संवाद-सम्बन्धान् रक्षितुं शक्नोति।

हितोपदेशस्य सामाजिकमूल्यबोधः- हितोपदेशः अपि बालसाहित्यस्य नीतिपरम्परायां महत्त्वपूर्णो ग्रन्थो विद्यते। अस्य कथासु मैत्री, नीतिः, सावधानता, सदाचारः व्यवहारज्ञानञ्च प्रतिपाद्यते। बालकः कथानकस्य माध्यमेन ज्ञातुं शक्नोति यत् मित्रस्य चयनं विचारपूर्वकं करणीयम्, अविचारितनिर्णयः हानिकारकं भवितुमर्हति, सहयोगेन कठिनकार्यं सुलभं भवति, बुद्धिश्च संकटमोचनस्य साधनं भवितुमर्हति। अतः नीतिकथासाहित्यं सामाजिकव्यवहारस्य प्रारम्भिकशिक्षां ददाति।

रामायण-महाभारतयोः सामाजिकमूल्यतत्त्वानि- रामायण-महाभारतयोः विशालाख्यानपरम्परायां सामाजिकजीवनस्य बहवः आयामाः दृश्यन्ते। परिवारः, भ्रातृत्वम्, मित्रता, कर्तव्यं, त्यागः, धर्मः, न्यायः, राज्यव्यवस्था मानवीयद्वन्द्वानि च विविधपात्राणां माध्यमेन प्रस्तुतानि सन्ति। बालोपयोगिरूपान्तरेण एतेषां कथानां माध्यमेन कर्तव्यबोधः, सत्यनिष्ठा, भ्रातृभावः, मित्रता, धैर्यम्, न्यायबुद्धिश्च इत्यादीनि मूल्यतत्त्वानि विकसितुं शक्यन्ते। अत्र आवश्यकं वर्तते यत् जटिलमहाकाव्यीयप्रसङ्गानां बालमनोविज्ञानानुकूलं चयनं प्रस्तुती-करणं च भवति।

दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च।
वेदाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भवेत्॥[13]

दानं, यज्ञः, तपः तथा धार्मिककर्माणि सत्ये प्रतिष्ठितानि सन्ति। अतः मानवेन सत्यस्य पालनं कर्तव्यम्। सामाजिकजीवने सत्यनिष्ठया परस्परविश्वासः वर्धते, सम्बन्धाः सुदृढाः भवन्ति, समाजे च नैतिकव्यवस्था स्थाप्यते। महाभारतेऽपि धर्मस्य पालनं केवलं व्यक्तिगतसाधनारूपेण न, अपितु सामाजिककल्याणस्य आधाररूपेण प्रस्तुतम् अस्ति। युधिष्ठिरस्य चरित्रे सत्यनिष्ठा, न्यायप्रियता तथा धर्मविषयकं चिन्तनं विशेषेण दृश्यते।

अहिंसा सत्यवचनं सर्वभूतहितं परम्।
अहिंसा परमो धर्मः स च सत्ये प्रतिष्ठितः।
सत्ये कृत्वा प्रतिष्ठां तु प्रवर्तन्ते प्रवृत्तयः॥[14]

रामायणे राम-लक्ष्मण-भरत-शत्रुघ्नानां परस्परसम्बन्धाः पारिवारिक-प्रेम्णः, त्यागस्य, विश्वासस्य च उदाहरणानि सन्ति। भरतस्य चरित्रे भ्रातृभक्तिः तथा राज्यलोभस्य अभावः विशेषतया प्रकटितः। सः श्रीरामस्य अधिकारं स्वीकृत्य तस्य प्रतिनिधिरूपेण राज्यव्यवस्थां धारयति। महाभारतेऽपि पाण्डवानां परस्परसहयोगः अनेकस्थलेषु दृश्यते। तथापि कौरव-पाण्डवयोः संघर्षः ईर्ष्यायाः, लोभस्य, अन्यायस्य च दुष्परिणामान् अपि दर्शयति। बालसाहित्यं सामाजिकसंवादस्य माध्यमं वर्तते। साहित्यं संवादं जनयति। एकस्य कथापात्रस्य अनुभवः अन्यस्य बालकस्य अनुभवेन सम्बद्धं भवितुं शक्यते। कथापठनानन्तरं शिक्षकः प्रश्नान् पृच्छति, बालकाः परस्परं विचारान् कथयन्ति, स्वानुभवान् विनिमयं कुर्वन्ति। अतः बालसाहित्यं पठनम्, चिन्तनम्, संवादः, आत्मपरीक्षणम्, व्यवहार-परिवर्तनं चेति प्रक्रियां प्रेरयितुं शक्नोति। इयमेव सामाजिक-मूल्यनिर्माणस्य वास्तविकप्रक्रिया अस्ति।

बालनाटकस्य भूमिका- बालनाटकं सामाजिकमूल्यनिर्माणस्य विशेषं प्रभावशाली माध्यमम् अस्ति। नाटकस्य पात्ररूपेण बालकः स्वयमेव कथानकस्य अङ्गं भवति। नाट्याभिनयेन सहयोगः, अनुशासनम्, संवादकौशलम्, नेतृत्वम्, आत्मविश्वासः, सहानुभूतिश्च विकसितुं शक्नुवन्ति। विशेषतः सामूहिकनाट्यप्रयोगः एकस्मै सर्वे, सर्वेभ्यः एकः इति सहयोगभावनां सुदृढां कर्तुं शक्नोति।

बालकवितायाः भूमिका- कविता बालमनसः स्वाभाविकं सोपानं वर्तते। लयः, तुकः, पुनरावृत्तिः कल्पनाचित्राणि च बालकस्य मनः आकर्षयन्ति। बालकवितासु यदि प्रकृतिस्नेहः, मित्रता, स्वच्छता, सत्यं, सहयोगः राष्ट्रस्नेहश्च इत्यादयः विषयाः मधुरलयेन प्रस्तुताः भवन्ति, तर्हि ते बालकस्य स्मृतौ दीर्घकालं तिष्ठन्ति। अतः कविता सामाजिकमूल्यानां भावात्मकसंस्कारस्य प्रभाविसाधनं वर्तते। बालसाहित्ये चित्रकथायाः महन्महत्त्वं वर्तते। बालकः दृश्यबिम्बैः शीघ्रं प्रभावितो भवति। चित्रकथायां शब्दैः सह चित्रं संयुक्तं भवति। अतः जटिलमूल्यविचारः अपि सरलतया बोधयितुं शक्यते। यथा एकः बालकः मार्गे पतितं वृक्षशाखां दृष्ट्वा तां मार्गात् अपसारयति। अन्ये बालकाः तस्य साहाय्यं कुर्वन्ति। एषा लघुचित्रकथा सहयोगं, सामाजिकउत्तरदायित्वं परोपकारं चैकस्मिन् दृश्ये दर्शयितुं शक्नोति।

आधुनिकडिजिटलयुगे बालसाहित्यस्य भूमिका- डिजिटलयुगे बालकस्य साहित्यिकानुभवः बहुमाध्यमीयो भवति। ई-पुस्तकं, ऑडियोबुक्, चलचित्रं, डिजिटलचित्रकथा शैक्षिक-अनुप्रयोगाश्च सामाजिकमूल्यनिर्माणस्य नूतनानि माध्यमानि सन्ति। यदि बालकः पञ्चतन्त्रस्य कथा एनीमेशनरूपेण पश्यति, ततः कथापात्रस्य निर्णयविषये प्रश्नं प्राप्नोति तथा अन्ते स्वस्य मतं लिखति, तर्हि साहित्यस्य अनुभवः केवलं ग्रहणात्मकः न भवति; सः आलोचनात्मकः तथा सृजनात्मकः अपि भवति।

कृत्रिमबुद्धिमत्ता मूल्यशिक्षणञ्च- कृत्रिमबुद्धिमत्तायाः साहाय्येन बालकस्य स्तरानुसारं साहित्यसामग्री निर्मातुं शक्यते। किन्तु ए-आई, निर्मितसामग्रीमध्ये मानवीयविवेकस्य स्थानं न विस्मर्तव्यम्।

मूल्यप्रधानबालसाहित्यस्य निर्माणे आवश्यकं भवति AI-साहाय्यं, लेखकस्य सृजनशीलता, शिक्षकस्य विवेकः, सांस्कृतिकप्रामाणिकता च। कृत्रिमबुद्धिमत्ता कथां निर्मातुं शक्नोति, किन्तु कथायाः सामाजिक-नैतिकप्रभावस्य अन्तिममूल्याङ्कनं मानवानामेव उत्तरदायित्वं वर्तते।

सामाजिकमूल्यनिर्माणे शिक्षकस्य भूमिका- बालसाहित्यं स्वयमेव मूल्यनिर्माणं न करोति; शिक्षकः तस्य अर्थव्याख्याने महत्त्वपूर्णं कार्यं करोति। एकां कथां पठित्वा शिक्षकः प्रश्नान् पृच्छति पात्रेण कः निर्णयः कृतः? सः निर्णयः उचितः वा? अन्यः विकल्पः कः भवितुम् अर्हति? यदि त्वं तत्र भवेत्, तर्हि किं कुर्याः? अस्य कथायाः सामाजिकसन्देशः किं वर्तते? एतादृशेन प्रश्नाधारितेन संवादेन बालकस्य आलोचनात्मकं चिन्तनं विकसितुं शक्नोति। शिक्षकेण सह अभिभावकस्य भूमिका महत्वपूर्णा भवति। बालसाहित्यस्य सामाजिकप्रभावे परिवारस्य योगदानमपि महत्त्वपूर्णं विद्यते। अभिभावकः बालकेन सह कथां पठेत्, कथां विषयीभूय संवादं कुर्यात् तस्य च विचारान् शृणुयात्। यदि बालकः कथां पठित्वा प्रश्नं पृच्छति, तर्हि तस्य जिज्ञासां निरुत्साहितुं नोचितं विद्यते। प्रश्नोत्तरसंवादेन बालकस्य नैतिकविवेकः सामाजिकज्ञानञ्च विकसितुं शक्नोति। बालसाहित्यस्य प्रभावः महत्त्वपूर्णो वर्तते, किन्तु सर्वसमस्यासमाधानं तेनैव न सम्भवति। सामाजिकमूल्यनिर्माणे परिवारः, विद्यालयः, समाजः, सञ्चारमाध्यमानि व्यक्तिगतानुभवाश्च सर्वेषां तत्त्वानां योगदानं भवति। अतः बालसाहित्यं मूल्यनिर्माणस्य एकं महत्त्वपूर्णं साधनं विद्यते, किन्तु एकमात्रं साधनं न विद्यते, तथैव उपदेशप्रधानता, अत्यधिकनैतिकीकरणम्, कृत्रिमआदर्शपात्राणि बालमनोविज्ञानविरुद्धविषयवस्तु च बालसाहित्यस्य प्रभावं न्यूनं कर्तुं शक्नुवन्ति।

आदर्शबालसाहित्यस्य आवश्यकता- सामाजिकमूल्यनिर्माणक्षमं बाल-साहित्यं निम्नलिखितगुणसम्पन्नं भवेत्, बालमनोविज्ञानानुकूलता, सारल्यं रुचिपूर्णञ्च, भाषिकशुद्धता, मूल्यपरकता, कल्पनाशीलता, सामाजिकयथार्थस्य समुचितप्रतिबिम्बनम्, विविधतायाः सम्मानः, सांस्कृतिकचेतना, वैज्ञानिकदृष्टिकोणः, पर्यावरणचेतना, सृजनात्म-कतायाः प्रेरणा, आधुनिकप्रौद्योगिक्याः विवेकपूर्णसमन्वयश्च। सामाजिकमूल्यनिर्माणस्य समन्वितप्रक्रिया भवति। बालसाहित्यस्य प्रभावं निम्नलिखितक्रमेण अवगन्तुं शक्यते साहित्यपठनम्, भावानुभवः, पात्रैः सह तादात्म्यम्, मूल्यविचारः, आत्मपरीक्षणम्, सामाजिकसंवादः, व्यवहाराभ्यासः, मूल्याधारितव्यक्तित्वनिर्माणं च। अयं क्रमो दर्शयति यत् सामाजिकमूल्यनिर्माणं केवलं कथाश्रवणेन न भवति। साहित्यिकानुभवः व्यवहारजीवने परिवर्तितः चेत् एव तस्य पूर्णः प्रभावो दृश्यते। बालसाहित्यं भाविसमाजस्य मानसिकभूमिं निर्माति। बालके यदि समानता, सहयोगः, सहिष्णुता, पर्यावरणसंरक्षणं सामाजिकोत्तरदायित्वं चेत्यादीनि मूल्यतत्त्वानि दृढानि भवन्ति, तर्हि भविष्ये सः अधिकं उत्तरदायित्वशीलो नागरिको भवितुं शक्नोति। अतः बालसाहित्यं वर्तमानसमाजस्य प्रतिबिम्बमात्रं न, अपि तु भाविसमाजस्य निर्माणसाधनमपि वर्तते।

निष्कर्षः- बालसाहित्यं बालकस्य कोमलमनसि संस्कारबीजानि रोपयति। तस्य प्रभावः तत्कालिकमनोरञ्जनपर्यन्तं सीमितः न भवति, अपि तु व्यक्तित्वस्य सामाजिकदिशां निर्धारयितुं शक्नोति। बालकः कथापात्रेषु आदर्शान् पश्यति, तेषां सुखदुःखयोः सह अनुभूयते, तेषां निर्णयानां परिणामान् ज्ञात्वा स्वजीवने उचितानुचितयोः विवेकं विकसितुं शक्नोति। अतः बालसाहित्यं सामाजिकमूल्यनिर्माणस्य सूक्ष्मतमेषु प्रभावशालीषु साधनेषु अन्यतमम् अस्ति। सामाजिकमूल्येषु मैत्री, सहयोगः, दया, सत्यनिष्ठा, सहिष्णुता, समानता, न्यायः, कर्तव्यबोधः, उत्तरदायित्वम्, परोपकारः तथा सामाजिकसमरसता इत्यादीनां विशेषं स्थानम् अस्ति। बालसाहित्यं एतानि मूल्यतत्त्वानि केवलं उपदेशरूपेण न, अपि तु कथा, कविता, संवाद, नाटक, चित्र तथा पात्राणां व्यवहारस्य माध्यमेन बालकस्य अनुभवजगतः सह सम्बद्धं करोति। अनेन मूल्याः बाह्योपदेशरूपेण न तिष्ठन्ति, अपि तु क्रमशः अन्तःकरणस्य संस्काररूपं गृह्णन्ति। भारतीयसाहित्यपरम्परायां पञ्चतन्त्रं, हितोपदेशः, रामायणम्, महाभारतम् तथा पुराणपरम्परा सामाजिकमूल्यनिर्माणस्य समृद्धानि स्रोतांसि सन्ति। एतेषु साहित्येषु मैत्री, नीति, कर्तव्यं, त्यागः, करुणा, सत्यं, धर्मः तथा सामाजिकउत्तरदायित्वम् इत्यादयः विविधरूपेण प्रतिपादिताः सन्ति। आधुनिकबालसाहित्यस्य दायित्वं तेषां मूल्यमयतत्त्वानां युगानुकूलं पुनर्सृजनं करणीयम्, न तु केवलं यथावत् पुनरावृत्तिः। आधुनिकप्रौद्योगिकी बालसाहित्यस्य सामाजिकभूमिकां अधिकं व्यापकां कर्तुं शक्नोति। ई-पुस्तकानि, श्रव्यकथाः, दृश्य-श्रव्यसामग्री, एनीमेशन, अन्तःक्रियात्मक-अनुप्रयोगाः तथा कृत्रिमबुद्धिमत्ताधारितसाधनानि बालकस्य साहित्यिकानुभवं समृद्धं कर्तुं शक्नुवन्ति। किन्तु तत्र मूल्याधारितता, भाषाशुद्धता, सांस्कृतिकप्रामाणिकता तथा मानवीयमार्गदर्शनं अनिवार्यम् अस्ति। अतः निष्कर्षतः वक्तुं शक्यते बालसाहित्यं केवलं बालमनोरञ्जनस्य साधनं न, अपि तु भाविसमाजस्य मूल्याधारितनिर्माणस्य संस्कारभूमिः अस्ति। यत्र बालसाहित्यं बालकस्य कल्पनाशक्तिं जागरयति, तत्रैव तस्य संवेदनशीलतां विकसितुं शक्नोति; यत्र तस्य ज्ञानं वर्धयति, तत्रैव सामाजिककर्तव्यस्य बोधं जनयितुं शक्नोति; यत्र तस्य मनोरञ्जनं करोति, तत्रैव मानवीयमूल्यानां बीजानि रोपयितुं शक्नोति। अतः स्वस्थसमाजस्य निर्माणाय स्वस्थबालसाहित्यस्य आवश्यकता अनिवार्या अस्ति। अन्ततः बालसाहित्यस्य सामाजिकमूल्यनिर्माणे सारं तत्त्वं ज्ञानं, मनोरञ्जनं, संवेदनशीलता, संस्कारः, सामाजिकउत्तरदायित्वं च इत्येषां समन्वये निहितम् अस्ति। एतादृशं बालसाहित्यं एव भावीपीढीं केवलं शिक्षितां न, अपि तु संवेदनशीलां, विवेकशीलां, सहयोगशीलां, उत्तरदायित्वपूर्णां तथा मानवतामूल्यसम्पन्नां कर्तुं समर्थं भविष्यति।

सन्दर्भितग्रन्थाः

[1] सुभाषितःश्लोकः

[2] तैत्तिरीयोपनिषद्, शिक्षावल्ली, 1/11/2,

[3] तैत्तिरीयोपनिषद्, शिक्षावल्ली, शान्तिपाठः;

[4] तैत्तिरीयोपनिषद्, शिक्षावल्ली, 1/11/1,

[5] मित्रसम्प्राप्तितन्त्रे मित्रमहिमावर्णनम्; श्लोकः 61, पृ. 22 इति निर्दिष्टः

[6] विष्णुशर्मा,पञ्चतन्त्रम्(संस्कृतमूलं भाषाटीकासहितम्), टीकाकारः पण्डित-ज्वालाप्रसादमिश्रः, द्वितीयं तन्त्रम्—मित्रसम्प्राप्तिः, पृ. 217

[7] मुण्डकोपनिषद् 3/1/6,

[8] तैत्तिरीयोपनिषद्, शिक्षावल्ली, अनुवाकः 11, मन्त्रः 01,

[9] श्रीमद्भगवद्गीता 3/20,

[10] श्रीमद्भगवद्गीता 3/21,

[11] ऋग्वेदः 10/191/02,

[12] हितोपदेशः 1.74

[13] वाल्मीकिरामायणम्, अयोध्याकाण्डम्, 2.101.14,

[14] महाभारतम्, वनपर्व, 3.198.69,